A

**911**

# SAMAGRA SHIKSHA, KERALA

## First Terminal Evaluation - 2019-20

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- IX**

Time 1 ½ Hours

Total Score - 40

---

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

---

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

क) कस्य दोषनिवारणाय औषधं नास्ति ?

(धनिकस्य , मूर्खस्य , सज्जनस्य, दरिद्रस्य)

ख) किं गणे नान्तर्भवति ?

(हितोपदेशः, पञ्चतन्त्रम्, बृहत्कथा, मेघसन्देशः )

ग) **'मत्स्याः मम जीवनहेतवः '** - कस्य वचनमिदम् ?

(बकस्य , कुलीरस्य, ग्रामीणस्य, कैवर्तकस्य

घ) **' वानरः '** इत्यर्थकं पदं लिखत ।

(मुनिः, राशिः, तिथिः, कपिः)

ङ) कृषेः समृद्धेः च देवता का?

(कर्षकश्री, केरश्री, देविश्री, अरिश्री )

**2. यथोचितं योजयत ।** 4x1=4

क) सञ्चारसाहित्यम् - सुदर्शनः।

ख) भेषजम् - सीता ।

ग) पाटलीपुत्रम् - एस्. के. पोट्टक्काट्।

घ) जानकी - औषधम् ।

**3. उदाहरणानुसारं सन्धिच्छेदं लिखत।** 1x1=1

उदा- जलाशयाश्च - जलाशयाः + च।

क) कुल्याश्च - ........... + ...........।

4. **अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** 1x1=1

क) भो बक ! कोऽत्र रक्षणोपायः ?

5. **उदाहरणानुसारं विग्रहवाक्यं लिखत।** 1x1=1

**उदा-** महान् च असौ कपिः च - महाकपिः ।

क) ........................ - महापुरुषः ।

6-10 **प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत ।** 4x2=8

6. **श्लोकं पठित्वा उचितमाशयं चित्वा लिखत।**

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ।।

आशयः
क) मूर्खस्य दोषनिवारणाय औषधं नास्ति।
ख) बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं करोति।
ग) सज्जनाः कृतमुपकारं कदापि न विस्मरन्ति।

7. **अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत।**

स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ।।

**गद्यक्रमः -** मारुतिः तस्य .......... मध्ये लतागृहान् चित्रगृहान् .......... प्रति जगाम। सीतां .......... सः चारुदर्शनां ताम् एव च न .......... ।

8. **समानार्थकपदानि चित्वा पट्टिकां पूरयत ।**

| | पदः | समानार्थः |
|---|---|---|
| उदा- | साधवः | सज्जनाः |
| | | |
| | | |

**साधवः , केदारः , मारुतिः, क्षेत्रं, सज्जनाः , हनुमान्**

9. **उदाहरणानुसारं ' न केवलं - अपि तु ' उपयुज्य वाक्यं परिवर्तयत ।**

**उदाः** - गणितपठनं श्रमकरं भवति । तत् आस्वाद्यं च भवति ।

गणितपठनं **न केवलं** श्रमकरं **अपि तु** आस्वाद्यं च भवति ।

क) जलं पानाय उपयुज्यते । तत् स्नानाय च उपयुज्यते ।

10. **अधोदत्तं वाक्यं पठित्वा क्त्वान्त - ल्यबन्तपदे चित्वा लिखत।**

विपदि धैर्यम् अवलम्ब्य, पितुः मनोगतं ज्ञात्वा च रामः वनवासाय प्रतस्थे ।

11-13 **प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** 2x4=8

11. **सूचनाः उपयुज्य लघुविवरणं लिखत।**

**सूचनाः** - आदिकाव्यम् - सुन्दरकाण्डम् - सीतान्वेषणम् - लङ्कानगरम्- सीतायाः अदर्शनम्- अनिर्वेदः ।

12. **सुभाषितं पठित्वा सूचनाः उपयुज्य आस्वादनटिप्पणीं लिखत।**

कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ।।

**सूचनाः** - चाणक्यनीतिः - सुष्ठु भाषितम् - मलिनवस्त्रधारिणम्- क्रूरभाषणं कुर्वन्तं- पुरुषोत्तमं- लक्ष्मीदेवी ।

13. **खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

भारतस्य उत्तरपूर्वभागे स्थितं सञ्चारयोग्यम् अतिप्रधानं राज्यं भवति आस्साम् । 'दिस्पूर् ' नगरमेव तस्य राजधानी। 'बहु' वंशीयाः तत्र निवसन्ति। नदीभिः जन्तुसस्य-वैविध्येन च समृद्धस्य अस्य देशस्य सैन्दर्यं वर्णनातीतमेव । काशिरङ्ग- मानस्- ओराङ् - इत्यादीनि दैशीयोद्यानानि तत्र सन्ति। आसांदेशवासिनां देशीयोत्सवः भवति 'बिहु'।

क) आसांदेशवासिनां देशीयोत्सवः कः ?

ख) कस्मिन् वंशे जाताः आसांदेशे निवसन्ति ?

ग) आसांदेशस्य राजाधानी का ?

घ) तत्रत्यानि उद्यानानि कानि ?

14. **प्रादेशिकभाषया विवर्तयत।** 1x5=5

विश्वप्रसिद्धः भौतिकशास्त्रज्ञः आसीत् स्टीफन् विल्यम् होक्किङ् (Stephen William Hawking) सः 1942 तमे वर्षे ब्रिट्टन् देशे ओक्स्फोर्ड् नगरे जनिमलभत। विंशतितमे वयसि नाडीकोशरोगं तम् आक्रमत। वर्षद्वयमेव जीवनकालः इति वैद्याः तं विज्ञापयन्ति स्म। रोगम् अतिजीव्य, बहुकालं जीवनं कृत्वा , समयमधिकृत्य गवेषणं च कृत्वा होक्किङ्स् लोकान् विस्मापितवान्।

15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत।

पद्मगर्भनामधेये सरसि वसन्तः मत्स्याः धीवरैः ग्रहणेन दुःखिताः , बकं रक्षणोपायं पृच्छन्ति। रक्षणोपायः अस्ति इति बकः प्रत्यवदत् 'अन्यजलाशयगमनमेव उपायः' । अस्मान् तत्र नय इति मत्स्याः ऊचुः । उपायेन बकः एकैकं नीत्वा खादति स्म।

बकः - मत्स्याः ! यूयं दुःखिताः खलु ? कारणं किम् ?

मत्स्याः - .................. ग्रहणेन दुःखिताः । रक्षणोपायः अस्ति वा?

बकः - ............... अस्ति।

मत्स्याः - कः उपायः?

बकः - ............... एव उपायः ।

मत्स्याः - अस्मान् तत्र .......... ।

बकः - तथास्तु ।

16. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहृत्य कालं सह वानरैश्चिरम्।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः।।

क) सुतीक्ष्णदण्डः वानरः कः ?

ख) काम् अदृष्ट्वा सुग्रीवसमीपगा गतिः नास्ति ?

ग) 'वानरैश्चिरम्' इत्यस्य पदच्छेदं लिखत ।

घ) 'पुरुषस्य भावः' इत्यस्य एकपदं श्लोकात् चित्वा लिखत ।

17. सूचनानुसारं कथां विपुलीकृत्य लिखत।

**सूचनाः** - कश्चित् काकः - पिपासाकुलः - अन्विष्यति- अल्पमात्रं - घटः - उपायम् अचिन्तयत्- पाषाणखण्डः - जलं पिबति।